दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णनवमी
श्रावण 22 प्रविष्टांशः मङ्गलमयः भवेत्


■ पृष्ठ-7 ■ वर्ष-5 ■ अङ्क-289 | 1 | अगस्त 07, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 संसदि कोलाहले पूर्व-मुख्यमन्त्री शान्ताकुमारः, अवदत् - 'कार्यं न चेत् वेतनं न' इति सिद्धान्तः प्रवर्तितः भवेत्

3 हिमाचले सुदृढं भविष्यति मार्ग-जालम्, केन्द्रीयमन्त्रिणा गडकरी-वर्येण ४०० कोटि-रूप्यकाणां परियोजनार्थः दत्ता सैद्धान्तिकी स्वीकृतिः

6 कृत्रिम-बुद्धिमत्ता-सङ्गणक-प्रविधिभ्यां बिहारस्य विधायकानां विधानपारिषदाञ्च भविष्यति सामर्थ्य-वर्धनम् – मुख्यमन्त्री बिहारः

## केंद्रीय-मन्त्रिमण्डलेन एकत्रिंशदधिक-सप्तशतोत्तर-त्रयोविंशतिसहस्र-कोटिरूप्यकाणां राष्ट्रीय-परिपत्र-जैवोर्जा-योजनायै स्वीकृतिः प्रदत्ता




केन्द्रीय मंत्रिमंडलेन 'गोबर धन' जैव-ऊर्जा-योजना एकत्रिंशदधिक सप्त-शतोत्तर त्रयोविंशति-सहस्रकोटि-रुप्यकाणां व्ययेन पारिता, येन सार्ध-लक्षं नव-वृत्यवसराः भविष्यन्ति तथा कृषि-गोमयादि-अपशिष्टेभ्यः स्वच्छ इन्धनं निर्मास्यते। एषा योजना अग्रिमिम दशवर्षं यावत् सेत्स्यति। अनेन सहैव असमे प्रायः अष्टसहस्र कोटि-रुप्यकाणां व्ययेन पंचत्रिंशदधिकैकशत किलोमीटर-दीर्घस्य चतुष्पथ-राजमार्गस्य निर्माणाय अपि स्वीकृति दत्ता।

### विपक्षिणां अनवरत-कोलाहलेन लोकसभा आदिनाय स्थगिता

नीट्-प्रकरणे आरक्षकाणां कार्याचरणातिक्रमममादाय विपक्षिणां अनवरत-कोलाहलेन लोकसभा आदिनाय स्थगिता। प्रथम-स्थगनात् परं यदा अपराले द्विवादने कार्याचरणं पुनरारब्धम्, तदा लोकसभया संयुक्त समित्याः पञ्चविंशत्यधिक-द्विसहस्रतमस्य विकसित भारतशिक्षाधिष्ठान विधेयकस्य उपस्थापन-समयः षड्विंशत्यधिक-द्विसहस्रतमस्य शीतकालीन सत्रस्य अन्तिम-सप्ताहं यावत् वर्धयितुम् अनुमतिः प्रदत्ता । विपक्षस्य तीव्र-कोलाहले एव वित्तमन्त्री निर्मला सीतारमण इत्येषा अनुमोदनार्थं कर-सम्बन्धि-अन्यविधि-विधेयकम् षड्विंशत्यधिक-द्विसहस्रतमं प्रस्तुतवती । विधेयकस्य अनुमोदनानन्तरं पीठासीनाधिकारी सन्ध्या राय इत्येषा अद्य प्रातः एकादशवादनं यावत् सभां स्थगितवती । इतः पूर्वं यदा प्रातः एकादशवादने सदनस्य कार्याचरणं प्रारब्धम्, तदा लोकसभया हिरोशिमा-नागासाकी-नगरयोः परमाणु-विस्फोटेन मृतेभ्यः श्रद्धाञ्जलिः समर्पितः। ततः परम् अध्यक्षः ओम् बिरला इत्यसौ प्रश्नकालस्य सञ्चालनाय प्रयासम् अकरोत्, किन्तु विपक्षस्य सदस्याः छात्र-प्रदर्शनेषु आरक्षकाणां कथितातिक्रम-विषये गृहमन्त्रिणः अमित शाहस्य वक्तव्यं अयाचन् । अस्मिन् क्षोभाकुले वातावरणे लोकसभा अपराले द्विवादनं यावत् स्थगिता ।

### संसदा द्वाविंश-त्रयोविंश-वित्तीयवर्षयोः अतिरिक्त-व्ययार्थम् चतुःपञ्चाशत्-सहस्र-कोटिरूप्यकाणां विनियोग विधेयकं पारितम्

संसदा अद्य षड्विंशत्युत्तरद्विसहस्रतमवर्षस्य 'विनियोग (संख्या-३) विधेयकं पारितम्। राज्यसभया विचारणानन्तरं एतत् विधेयकं लोकसभायै प्रत्यर्पितम्। लोकसभया एतत् पूर्वमेव पारितम् आसीत्। अस्मिन् विधेयके द्वाविंशतितः त्रयोविंशतिः वित्तीय वर्षे भारतस्य सञ्चित-निधेः स्वीकृत राशिभ्यः अतिरिक्तानां व्ययानाम् अधिकृत-स्वीकृतेः प्रावधानम् अस्ति।

### केन्द्र-सर्वकारेण जम्मू-कश्मीर-केन्द्रशासित-प्रदेशाय महती वित्तीय-प्रशासकीय-सहायता प्रदत्ता

जम्मू-कश्मीर-विषये सदने आशङ्काः शमयन्ती वित्तमन्त्री निर्मला सीतारामन् अवदत् यत् सप्तत्युत्तरत्रिशत-अनुच्छेदस्य विलोपनात् परं केन्द्र-सर्वकारेण जम्मू-कश्मीर-केन्द्रशासित-प्रदेशाय महती वित्तीय-प्रशासकीय-सहायता प्रदत्ता। सा न्यवेदयत् यत् जम्मू-कश्मीर-आरक्षक-बलस्य वेतनानां निवृत्तिवेतनानां च सम्पूर्णः भारः केन्द्र-सर्वकारेण ऊह्यते। मन्त्रिणा स्पष्टीकृतं यत् अनुच्छेदस्यास्य निरसनेन पुनरेकवारं सिद्धम् अभवत् यत् पाक-अधिकृत-भूभागेन सह समग्रः जम्मू-कश्मीर-प्रदेशः भारतस्य अभिन्नः अङ्गः अस्ति। विधेयक-पारणानन्तरं सभापति-पीठे उपविष्टः घनश्याम तिवारी सदनस्य कार्याचरणम् आदिनाय अस्थगयत्। अद्य प्रातः एकादश-वादने सदनस्य उपवेशनं पुनः सेत्स्यति।

### उच्च-सदनस्य सदस्यः नीरज डाङ्गी संसदि काङ्ग्रेस-दलस्य मुख्य-सङ्घटकपदे मनोनीतः



उच्च-सदनस्य सदस्यः नीरज डाङ्गी संसदि काङ्ग्रेस-दलस्य मुख्य-सङ्घटकपदे मनोनीतः । काङ्ग्रेस-संसदीय-अध्यक्षया सोनिया गान्धी इत्यनया अस्य प्रख्यापनं कृतम्।

### मुंबई-उच्चन्यायालयेन यौनोत्पीडन-प्रकरणे तहलका-संस्थायाः पूर्व-सम्पादकाय तरुण-तेजपालाय दशवर्षात्मकः कठोर कारावासदण्डः श्रावितः

बॉम्बे-उच्च-न्यायालयेन 'तहलका' पत्रिकायाः भूतपूर्वः सम्पादकः तरुण-तेजपालः यौन-उत्पीड़न-प्रकरणे दोषी घोषितः, तस्मै च दश-वर्षाणां कठोर कारावासस्य दण्डः श्रावितः। अनेन सहैव न्यायालयेन तेजपालाय एकविंशति-सहस्रोत्तर दश-लक्ष--रुप्यकाणाम् आर्थिक-दण्डः अपि प्रयुक्तः, स च राशिः पीडितायै प्रदास्यते।

### मेटा-संस्थायाः मुख्य कार्यकारी अधिकारिणः मार्क-जुकर्बर्ग इत्यस्य क्षमायाचना भारतस्य संविधानस्य, संसदः च महत्तरः विजयः-निशिकान्तः

सञ्चार-सूचनाप्रौद्योगिकी-विषयक-संसदीय-स्थायिसमित्याः अध्यक्षः भारतीय जनता पार्टीति दलस्य वरिष्ठ-सांसद् निशिकान्त दुबे इत्यसौ मेटा-संस्थायाः मुख्य कार्यकारी अधिकारिणः मार्क-जुकर्बर्ग इत्यस्य क्षमायाचना भारतस्य संविधानस्य, संसदः च महत्तरः विजयः इत्यभिहितवान्। संसद्-परिसरे वार्ताहरैः सह सम्भाषमाणः सः अब्रवीत् यत् एतेन स्पष्टीभवति यत् यः कोऽपि भारते व्यापारं कर्तुम् इच्छति, तेन भारतस्य नियमानां पूर्णतया पालनं करणीयमेव।

## सुभाषितम्

**आयं पश्यन्व्ययं कुर्यात्
आयादल्पतरं व्ययम्।
आयाभावे व्ययं कुर्वन्
कुबेरोऽपि विनश्यति।।**

भावार्थः- हमें सदैव अपनी आय को देखते हुए ही व्यय करना चाहिए तथा व्यय कुल आय से कम ही होना चाहिए। यदि आय से अधिक व्यय हो जाता है तो कुबेर का भी विनाश हो सकता है।




### पुनः प्रारब्धा जम्मू-कश्मीर-राज्ये सुरक्षा-कारणात् एक-दिवसं यावत् स्थगिता 'श्रीअमरनाथ-यात्रा'

जम्मू-कश्मीर-राज्ये सुरक्षा-कारणात् एक-दिवसं यावत् स्थगिता वार्षिकी 'श्रीअमरनाथ-यात्रा' गतदिने पुनः प्रारब्धा। जुलाइ-मासस्य तृतीय दिनाङ्कात् आरब्धायाम् अस्याम् पवित्र-यात्रायां प्रतिदिनं सहस्रशः भक्ताः बहु-स्तरीय-सुरक्षा-व्यूहे अमरनाथ-गुहां प्रति गच्छन्ति। अस्याः यात्रायाः प्रारम्भात् अद्यावधि सप्तति-सहस्राधिक चतुर्-लक्ष श्रद्धालुभिः पवित्र-गुहा-धाम्नि दर्शनं विहितम्। सर्वकारेण तीर्थयात्रिणां सौविध्याय सुरक्षायै च उत्तमाः प्रबन्धाः विहिताः सन्ति ।

## सर्वोच्च न्यायालयस्य पीठेन नीट-युजी-परीक्षायाः सङ्गणकीकरण-प्रसङ्गे केन्द्रस्य शपथ-पत्रे याचिकाकर्तृणाम् अभिमतं समाहूतम्




सर्वोच्च न्यायालयस्य पीठेन नीट-युजी-परीक्षायाः सङ्गणकीकरण-प्रसङ्गे केन्द्रस्य शपथ-पत्रे याचिकाकर्तृणाम् अभिमतं समाहूतम्। केन्द्रेण अत्राभिहितं यत् पारम्परिक-लेखनी-पत्र-प्रणाल्याः स्थाने सङ्गणक-माध्यमेन परीक्षा-आयोजनाय विचारः क्रियते। अस्य वादस्य अग्रिमा विचारणा अगस्त-मासस्य एकोनविंशति-तिथौ भविष्यति। केन्द्र-सर्वकारेण न्यायालये निवेदितं यत् संयुक्त-प्रवेश-परीक्षा इव नीट-परीक्षाम् अपि एक-स्तरीय-द्वि-स्तरीय-वा सङ्गणक प्रणाल्या आयोजयितुं विचार्यते। सर्वकारेण इतोऽपि प्रोक्तं यत् प्रश्नपत्र-गोप्यताभंगं व्यवस्थागत-विफलताश्च समूलम् उन्मूलयितुं नीट-परीक्षा-प्रक्रियायाः व्यापको परिष्कारः आरब्धः अस्ति।

## राजनाथ सिंहः अब्रवीत् यत् प्रादेशिक-सेना नागरिक सैनिक इत्यवधारणायाः जीवन्तं प्रतीकम् अस्ति

रक्षामन्त्री राजनाथ सिंहः नवदिल्ल्यां टेरिटोरियल आर्मी इति विषयमधिकृत्य रक्षामन्त्रालयस्य संसदीय-मन्त्रणा समित्याः उपवेशनस्य अध्यक्षताम् अकरोत्। उपवेशने सम्बोधमानः राजनाथ सिंहः अब्रवीत् यत् प्रादेशिक-सेना नागरिक सैनिक इत्यवधारणायाः जीवन्तं प्रतीकम् अस्ति। सः प्रावोचत् यत् अस्याः सेनायाः सदस्याः यद्यपि असैन्य-कार्येषु संलग्नाः भवन्ति, तथापि ते सीम्नां सुरक्षायै आन्तरिक सुरक्षायाः पालनाय च सदैवव सैन्य-वेशमपि सन्धरन्ति। केरले समागते जलाप्लावे, ओडिशा-राज्यस्य चक्रवाते, असम राज्ये च प्रसृते जलौघे च सहायतायै उद्धार-कार्याणां सम्पादनाय, आपद्ग्रस्तेभ्यः जनेभ्यः चिकित्सा सहायता-प्रदानाय च प्रादेशिक-सेनायाः योगदानम् राजनाथ-महोदयेन विशेषतः प्रशंसितम्।

## क्रीडावार्ता- महिला-एशिया-चषक-2026-स्पर्धायाः समयसारिणी प्रकाशिता

एशियाई-क्रिकेट-परिषदा (ACC) महिला-एशिया-चषक-2026-स्पर्धायाः पूर्णः कार्यक्रमः घोषितः। एषा टी-20 प्रारूपस्य स्पर्धा 28 अगस्त-दिनाङ्के दुबई-अन्तर्राष्ट्रि-क्रिकेट-क्रीडाङ्गणे आरप्स्यते, अन्तिमः (फाइनल) मुकाबला च 13 सितम्बर-दिनाङ्के क्रीडिष्यते। 'ए'-समूहे भारतम्, पाकिस्तानम्, थाइलैण्ड्, हाङ्काङ्ग च स्थापितानि सन्ति, भारत-पाकिस्तानयोः मध्ये महामुकाबला आकर्षणस्य केन्द्रं भविष्यति।

## जोस बटलरः टी-20 क्रिकेट-क्रीडायाम् इतिहासम् अरचयत्

आङ्ग्लदेशस्य विस्फोटकः बल्लेबाजः जोस बटलरः टी-20 क्रिकेट-इतिहासस्य सर्वेधकाः धावनाङ्काः (runs) प्राप्नुवन् प्रथमः क्रीडकः अभवत्। सः कीरोन पोलार्डस्य महारिकॉर्डं भंक्त्वा एतां उपलब्धिं स्वनाम्नि अकरोत्।

### भारतस्य कुन्त-क्षेपकौ आशीष यादव-टी-धरणीधरनः तथा चक्र-क्षेपिका अमानत-कम्बोज-च अन्तिम चक्रं प्रविष्टवन्तः

अमरीका-देशस्य यूजीन-नगरे प्रवृत्तायां विश्व-एथलेटिक्स-अंडर-20-प्रतियोगितायाम् भारतस्य कुन्त-क्षेपकौ आशीष यादव-टी-धरणीधरनः तथा चक्र-क्षेपिका अमानत-कम्बोज-च स्व-प्रतिस्पर्धानाम् अन्तिम चक्रं प्रविष्टवन्तः । एतेषाम् क्रीडकानाम् अन्तिम स्पर्धाः भानुवासरे आयोजयिष्यन्ते।

## संसदि कोलाहले पूर्व-मुख्यमन्त्री शान्ताकुमारः, अवदत् - 'कार्यं न चेत् वेतनं न' इति सिद्धान्तः प्रवर्तितः भवेत्



हिमसंस्कृतवार्ताः — पालमपुरम्।
संसदः मानसून-सत्रे निरन्तरं जायमाने कोलाहले चर्चां विना च उपवेशनस्य (कार्याचरिणायाः) स्थगने हिमाचलप्रदेशस्य पूर्वतनः मुख्यमन्त्री वरिष्ठः भाजपा-नेता शान्ताकुमारस्य व्यथा रोषश्च प्रकटितः। शान्ताकुमारः अवदत् यत् भारतं विश्वस्य विशालतमं लोकतन्त्रम् अस्ति। एतत् प्राप्तुं सहस्रशः देशभक्ताः आहुतिम् (बलिदानम्) अयच्छन्। देशभक्तानाम् आहुत्या प्राप्तं लोकतन्त्रम् अधुना दुर्बलं भवन् दृश्यते। संसदि चर्चा अतीव न्यूना कोलाहलश्च अत्यधिकः भवति। बहुवारं संसदः सम्पूर्णं सत्रं चर्चां विनैव व्यतीयात्। बहूनि महत्त्वात्मकानि विधेयकानि चर्चां विनैव पारितानि भवन्ति। तेन उक्तं यत् देशस्य दुर्भाग्यम् अस्ति यत् पारतन्त्र्य-भारतस्य राजनीतिः देशाय आसीत्। भगतसिंह-सदृशाः अनेके देशभक्ताः हसन्तः एव पाश-रज्जुं (फांसी का फंदा) अधारयन्, परन्तु स्वतन्त्र-भारतस्य राजनीतिः केवलं पीठाय (कुर्सी) स्वार्थाय च भवन्ती अस्ति। शान्ताकुमारः अवदत् यत् संसदि कोटिशः रूप्यकाणि व्ययीक्रियन्ते। यदा संसदि किमपि कार्यं न भवति, केवलं उच्चैः घोषणम् (नारेबाजी), कोलाहलः अशान्तिश्च भवति, तदा अपि सांसदाः लक्षशः कोटिशः रूप्यकाणि वेतन-वृत्यानां रूपेण स्वीकुर्वन्ति। संसदः चर्चायाः कृते अस्ति तथा च वेतनं वृत्यानि च कार्यं कर्तुं सन्ति। तेन याचना कृता यत् संसदि "कार्यं न चेत् वेतनं न" इति सिद्धान्तः प्रवर्तितं क्रियेत। येषां सांसदानां कारणेन कार्यं न भवति कोलाहलश्च भवति, तेभ्यः तस्याः अवध्याः वेतनं वृत्यानि च न लब्धव्यानि।
शान्ताकुमारः अवदत् यत् विश्वस्य विशालतमस्य लोकतन्त्रस्य संसदः केवलं द्वयोः अवसरयोः शान्ता तिष्ठति। कस्यापि महतः नेतुः निधने शोक-प्रस्तावस्य समये कोऽपि शब्दः न भवति। कदाचित् यदा सर्वेषां सांसदानां वेतन-वृत्यानां वर्धनस्य विधेयकम् आगच्छति, तदा अपि संसदः शान्ता तिष्ठति। एतौ द्वौ अवसरौ विहाय लोकसभा अधिकांश-समयं "शब्द-सभा" (शोर सभा) भवति। शान्ताकुमारः देशस्य सर्वेभ्यः नेतृभ्यः लोकतन्त्रस्य अस्य वर्धमानस्य अवमूल्यनस्य रोधनाय प्रार्थनाम् अकरोत्।

## विद्यालयीय-छात्राणाम् कौशल-विकासाय नियुक्ष्यन्ते १२०० नूतनाः शिक्षकाः - शिक्षा-मन्त्री




हिमसंस्कृतवार्ताः — शिमला।
हिमाचलप्रदेशे विद्यालयीर-छात्राणाम् कौशल-विकासाय नूतना दिशा दातुं सज्जीकरणम् आरब्धम्। प्रदेशसर्वकारः विद्यालयेषु व्यावसायिकं कौशल-आधारितं च शिक्षणम् सुदृढं विधातुम् १२०० नूतनानां शिक्षकाणां नियुक्तिं कर्तुं गच्छति। शिक्षा-मन्त्रिणा रोहितठाकुरेण प्रोक्तं यत् परिवर्तमाने काले केवलं पुस्तकीया शिक्षा पर्याप्ता न, अपितु छात्रान् जीविकोन्मुख्या व्यावहारिकया च शिक्षया सह योजयितुं समयस्य आकाङ्क्षा अस्ति। गुरुवासरे शिमलायाम् 'अमर-उजाला-स्कूल-एक्सीलेंस-अवार्ड-२०२६' सम्मेलने उत्कृष्टं कार्यं कृतवतां सर्वकारीयाणां वैयक्तिकानां च विद्यालयानां प्रधानाचार्यान् सम्मानितान् कृत्वा शिक्षा-मन्त्रिणा अवदत् यत् सर्वकारेण सार्ध-त्रि-वर्षेषु शिक्षा-क्षेत्रे बहवः कठोराः निर्णयाः गृहीताः।
असौ अवदत् - 'शिक्षा उपाधि (Degree) पर्यन्तं परिमिता न भवेत्'
एतेषां निर्णयानाम् एव परिणामः अस्ति यत् हिमाचलप्रदेशः अद्य देशे शिक्षायाः क्षेत्रे तृतीय-स्थाने प्राप्तः अस्ति। सर्वकारस्य आगामी लक्ष्यं प्रदेशं देशस्य प्रथमं पूर्ण-साक्षर-राज्यं रचयितुम् अस्ति। अस्य कृते विशेष-अभियानं चाल्यमानम् अस्ति आगामि-एकस्य वर्षस्य अभ्यन्तरे हिमाचले शत-प्रतिशत-साक्षरता-दरं प्राप्तुं प्रयासः करिष्यते। तेन उक्तं यत् शिक्षा केवलम् उपाधि-पर्यन्तं परिमिता न भवेत्, अपितु समाजे सकारात्मक-परिवर्तनस्य आत्मनिर्भरतायाश्च माध्यमं भवेत्। कस्यापि विद्यालयस्य सफलता तस्य नेतृत्वे आश्रिता भवति। प्रधानाचार्याः न केवलं प्रशासनिक-मुख्याः भवन्ति, अपितु ते छात्रान् शिक्षकांश्च प्रेरयन्तः मार्गदर्शकाः अपि भवन्ति। ये विद्यालयाः प्रधानाचार्याश्च सम्मानिताः संजाताः, ते सम्पूर्ण-प्रदेशस्य कृते प्रेरणा-स्रोतांसि सन्ति। विद्यालयानां प्रधानाचार्याणां च सम्मानस्य प्रयासस्य प्रशंसां कुर्वता तेन उक्तं यत् अनेन शिक्षा-जगत्-क्षेत्रे सकारात्मक-प्रतिस्पर्धायाः प्रोत्साहनं लप्स्यते। तादृशाः मञ्चाः शिक्षकाणाम् शैक्षणिक-संस्थानां च उत्कृष्ट-कार्याणि अभिज्ञानं दापयितुं कार्यं कुर्वन्ति। सम्मेलने प्रदेशस्य विविध-मण्डलेभ्यः आगताः प्रधानाचार्याः, शिक्षाविदः, शिक्षा-विभागस्य अधिकारिणश्च भागं गृहीतवन्तः। सम्मानित-प्रधानाचार्यैः एतत् शिक्षा-क्षेत्रे श्रेष्ठ-कार्यं कर्तुं प्रेरणा प्रोक्ता।

# HP MONSOON UPDATE - महत्या वर्षया भूस्खलनेन च १२० मार्गाः अवरुद्धाः काङ्गड़ा-मण्डले गृहं ध्वस्तम्, पितामहः पौत्री च आहतौ




**हिमसंस्कृतवार्ताः — कार्यालयीयः प्रतिनिधिः।** हिमाचलप्रदेशस्य अधिकांश-भागेषु गुरुवासरे संजातया वर्षया जनजीवनम् प्रभावितम् अभवत्। राजधानी-शिमला-मध्ये धारासारवृष्टिः अभवत्, यदा च किन्नौर-मण्डलस्य निगुलसरी-स्थाने पर्वतात् बृहत्-मलिनावशेषस्य शिलानां च पतनात् राष्ट्रिय-राजमार्ग-५ (NH-5) प्रायः ११ होराः (घण्टाः) यावत् अवरुद्धः अभवत्। महत्या वर्षया भूस्खलनेन च १२० मार्गाः स्थगिताः सन्ति। सिरमौर-मण्डले २६ मार्गाः, चम्बा-मण्डले पञ्च, काङ्गड़ा-मण्डले पञ्च, कुल्लू-मण्डले ३१, मण्डी-मण्डले ३८, शिमला-मण्डले १३ तथा च ऊना-मण्डले द्वौ मार्गौ स्थगितौ स्तः। सोलन-बिलासपुर-हमीरपुर-ऊना-मण्डलेषु यातायातं सामान्यम् अस्ति। प्रदेशे मानसून-ऋतौ अधुना यावत् ७९७ कोटि-रूप्यकाणां सम्पत्तेः हानिः संजाता। प्रदेशे वर्षया, प्लावनेन (बाढ़), भूस्खलनेन दुर्घटनाभिश्च १४२ जनानां प्राणाः गताः सन्ति। अधुना १४२ अपक्क-गृहाणि (कच्चे मकान) ९० पक्क-गृहाणि (पक्के मकान) च क्षतिग्रस्तानि संजातानि।

## पर्वतात् प्रस्तराणां मलिनावशेषस्य च पतनात् मार्ग-पार्श्वे तिष्ठन्त्यौ द्वे कार-याने क्षतिग्रस्ते

किन्नौर-मण्डलस्य निगुलसरी-स्थाने प्रातः प्रायः सार्ध-षड्-वादने पर्वतात् बहवः प्रस्तराः मलिनावशेषः च एन.एच.-५-मार्गे अपतत्। मार्गस्य अवरोधेन उभयोः पार्श्वयोः वाहनानां दीर्घाः पङ्क्तयः सञ्जाताः। सीमा-मार्ग-सङ्घटनस्य तथा च 'एन.एच.ए.आई.'-दलैः प्रातःकालतः एव पुनः सञ्चालन-कार्यम् आरब्धम्, परन्तु पर्वतात् निरन्तरं प्रस्तर-पतनात् मार्ग-मोचने बहु समयः अलभत। सायं प्रायः सार्ध-पञ्च-वादने यातायातं पुनः सञ्चालितं कर्तुं शक्तम्। शिमला-नेरवा-मुख्यमार्गे गुरुवासरे पर्वतात् प्रस्तराणां मलिनावशेषस्य च पतनात् मार्ग-पार्श्वे तिष्ठन्त्यौ द्वे कार-याने क्षतिग्रस्ते अभवताम्। सन्तोषस्य विषयः एषः आसीत् यत् दुर्घटना-काले वाहनेषु कोऽपि उपस्थितः नासीत्। काङ्गड़ा-मण्डलस्य फतेहपुर-उपमण्डलस्य सुनहारा-पञ्चायतस्य बडियाली-ग्रामे बुधवासरे विलम्ब-रात्रौ महत्या वर्षया एकम् अपक्क-गृहं (कच्चा मकान) ध्वस्तम् अभवत्। दुर्घटनायां प्रायः ८० वर्षीयः रमेशः तस्य पौत्री च आहतौ अभवताम्। उभौ उपचाराय चिकित्सालयं प्रापितौ।

## भूस्खलनस्य प्रवाहे तिस्रः मेषाः मृताः

तत्रैव चम्बा-मण्डले भूस्खलनस्य प्रवाहे आगमनेन तिस्रः मेषाः (भेड़ें) मृताः, यदा च पर्वतात् प्रस्तर-पतनेन एका धेनुः अपि प्राणांस्त्यक्तवती। वर्षया भूस्खलनेन च सिरमौर-मण्डलम् सर्वाधिकम् प्रभावितम् अभवत्। मण्डले २८ मार्गाः ३३ पेयजल-सेचन-योजनाश्च स्थगिताः सन्ति। ददाहू-संगड़ाह-मार्गे 'वालिया-माइंस'-समीपे मलिनावशेषस्य पतनेन यातायातम् प्रायः तिस्रः होराः प्रभावितम् अभवत्। नाहन-ददाहू-मार्गे बडोलिया-समीपे 'ट्रक'-यानस्य परिवर्तनेन (पलटने से) अपि द्वे होरे यावत् गमनागमनं बाधिकम् अभवत्। नाहन-कुमारहट्टी, काला-अंब-देहरादून तथा च पांवटा-शिलाई-लालढांक-राष्ट्रिय-राजमार्गेषु अपि बहुषु स्थानेषु प्रस्तराणां मलिनावशेषस्य च आगमनेन यातायातम् प्रभावितम् अभवत्। जटौन-जलाशयात् (Dam) उत्तराखण्डस्य केभ्यश्चित् जलाशयेभ्यः जलस्य मोचनात् परम् पांवटा-साहिब-स्थिते यमुनाघाटे जलस्तरः वर्धितः। प्रशासनेन जनेभ्यः नदी-नाला नाम जलधाराणां च पार्श्वे न गन्तुम् प्रार्थना कृता। अपरत्र, काङ्गड़ा, कुल्लू तथा च मण्डी-मण्डलस्य बहुषु क्षेत्रेषु वर्षा पञ्जीकृता। यद्यपि चम्बा, हमीरपुरं तथा च ऊना-मण्डलस्य अधिकांश-भागेषु ऋतुः अपेक्षया शुष्कः आसीत्। एतेषु मण्डलेषु आर्द्र-उष्मणा (उमस भरी गर्मी) जनाः पीडिताः अभवन्।

# हिमाचले सुदृढं भविष्यति मार्ग-जालम्, केन्द्रीयमन्त्रिणा गडकरी-वर्येण ४०० कोटि-रूप्यकाणां परियोजनाभ्यः दत्ता सैद्धान्तिकी स्वीकृतिः




**हिमसंस्कृतवार्ताः — शिमला।** हिमाचलस्य कृते केन्द्रीय-मन्त्री नितिनगडकरी-वर्यः ४०० कोटि-रूप्यकेभ्यः अधिकानाम् द्वयोः मार्ग-परियोजनयोः कृते स्वकीयां सैद्धान्तिकीं स्वीकृतिम् अददत्। एतासु नगरोटा-बगवां-रानीताल-मार्गाय ३९३ कोटि-रूप्यकाणि अतिरिच्य सैञ्ज-लूहरी-बञ्जार-औट-मार्गाय २३.११ कोटि-रूप्यकाणां प्रस्तावः सम्मिलितः अस्ति। गुरुवासरे देहल्याम् लोक-निर्माण-मन्त्रिणा विक्रमादित्यसिंहेन केन्द्रीय-मन्त्रिणः सम्मुखं कृतात् दृढ-पक्षात् (पैरवी) अनन्तरम् एताः स्वीकृतयः प्राप्ताः। अस्मिन् अन्तरे विक्रमादित्यसिंहेन 'सी.आर.आई.एफ.' इत्यस्य अन्तर्गतं प्रदेशाय प्रतिवर्षं २०० कोटि-रूप्यकाणाम् आवण्टनम् 'सेतु-बन्धन-योजना' इत्यस्याः सेतूनां निर्माणाय बजट-धनम् अपि याचितम्। यत्किञ्चित् केन्द्रीय-मन्त्रिणा लोक-निर्माण-मन्त्रिणा स्थापितानां याचनानाम् उपरि सहानुभूतिपूर्वकं विचारं कृत्वा कार्यान्वयनस्य (अमलीजामा) आश्वासनं दत्तम्। सूचनानुसारं गुरुवासरे लोक-निर्माण-मन्त्री विक्रमादित्यसिंहः मार्ग-परिवहन-राष्ट्रियराजमार्ग-मन्त्रिणा नितिनगडकरी-वर्येण सह देहल्यां मेलनम् अकरोत्। अस्मिन् अन्तरे केन्द्रीय-मन्त्रिणा हिमाचलेन सम्बद्धासु विविधासु मार्ग-परियोजनासु विस्तरेण चर्चा कृता। विक्रमादित्यसिंहः ज्ञापितवान् यत् केन्द्रीय-मन्त्रिणा राष्ट्रिय-राजमार्ग-३०५ इत्यस्य अन्तर्गतं सैञ्ज-लुहरी-बञ्जार-औट-मार्गे बञ्जार-तः औट-पर्यन्तं मार्गस्य परिष्काराय 'टारिंग'-कार्याय च २५.११ कोटि-रूप्यकाणां राशिं प्रसारयितुं सैद्धान्तिकी स्वीकृतिः प्रदत्ता। लोक-निर्माण-मन्त्रिणा राष्ट्रिय-राजमार्ग-३०३ इत्यस्मिन् नगरोटा-बगवां-रानीताल-मार्गाय ३९५ कोटि-रूप्यकाणि उपलब्धं कारयितुम् आग्रहः अपि केन्द्रीय-मन्त्रिणा सह कृतः। अस्य कृते केन्द्रीय-मन्त्रिणा सैद्धान्तिकी सम्मतिः दत्ता। तेन केन्द्रीय-मन्त्रिणः जलोड़ी-सुरङ्ग-परियोजनायै १,७७५ कोटि-रूप्यकाणां स्वीकृत्याः प्रक्रियायां तीव्रता आनेतुम् आग्रहः अपि कृतः। यस्मिन् केन्द्रीय-मन्त्रिणा मन्त्रालयस्य अधिकारिणः स्वीकृति-प्रक्रियां शीघ्रं पूर्णं कर्तुं निर्दिष्टाः। लोक-निर्माण-मन्त्रिणा सेतु-बन्धन-परियोजनायाः अन्तर्गतं सेतूनां निर्माणाय ३.४६ कोटि-रूप्यकाणां राशिम् उपलब्धं कारयितुम् अपि आग्रहः कृतः। एतदतिरिच्य तेन राज्यस्य भौगोलिकीः परिस्थितीः दृष्ट्वा 'सी.आर.आई.एफ.' तथा च 'सेतु-बन्धन'-योजनानां अन्तः अधिकाः मार्ग-परियोजनाः स्वीकृत्यै तथा च 'सी.आर.आई.एफ.' इत्यस्य अन्तर्गतं मार्ग-परियोजनाभ्यः वार्षिक-आवण्टनं वर्धयित्वा २०० कोटि-रूप्यकाणि कर्तुम् आग्रहः अपि कृतः।

अस्मिन् अन्तरे विक्रमादित्यसिंहेन २०२६-२७ तमस्य वर्षस्य कृते केन्द्रीय-मार्ग-संरचना-निधेः (CRIF) अन्तर्गतं २३९.४५ कोटि-रूप्यकाणां व्ययस्य द्वयोः महत्त्वपूर्णयोः मार्ग-परियोजनयोः स्वीकृतये केन्द्रीय-मन्त्रिणे नितिनगडकरी-वर्याय कार्तज्ञ्यम् (आभारः) प्रकटितम्। एतासु टिक्कर-जरोल-गाहन-ननखड़ी-खमाड़ी-मार्गस्य तथा च छैला-नेरीपुल-यशवंतनगर-कुमारहट्टी-मार्गस्य उन्नयन-कार्यं सम्मलितम् अस्ति। तेन उक्तं यत् एताभिः परियोजनाभिः प्रदेशस्य सेब-उत्पादन-क्षेत्रस्य जनेभ्यः विशेषः लाभः लप्स्यते। विक्रमादित्यसिंहेन ज्ञापितं यत् केन्द्रीय-मन्त्रिणा नितिनगडकरी-वर्येण हिमाचलप्रदेशाय मार्ग-संरचनायाः विकासाय सर्वसम्भव-सहयोगं दातुम् आश्वासनं दत्तम्।

# विविधवर्णैर्नृत्यैः सजीवता प्राप्नोद भारतस्य 'अनेकत्वेऽप्येकत्वम्' इति सांस्कृतिकवैभवम्

### डी. पी. एस. बोकारो इत्यत्र अन्तर्सदनीय- समूहनृत्यस्पर्धया प्राथमिक-प्रभागस्य 'धरोहर' सांस्कृतिक- महोत्सवस्य समापनम्




**हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो।**
दिल्ली- पब्लिक- स्कूल- बोकारो इत्यस्य प्राथमिकविभागेन आयोजितस्य 'धरोहर' इति सांस्कृतिकमहोत्सवस्य समारोपः गुरुवासरे अन्तर्सदनीय- समूहनृत्यस्पर्धया परमोल्लासपूर्णे वातावरणे सम्पन्नः। विद्यालयस्य षण्णां सदनानां द्वितीयतः पञ्चमकक्षापर्यन्तं छात्रैः समुत्साहेन सहभागित्वं कृत्वा स्वीयं नृत्यकौशलं, कलाप्रतिभां, सामूहिकसमन्वयं च विलक्षणतया प्रदर्शितम्। नानाप्रान्तीयपरम्परागतवेषभूषाभिः विभूषितैः बालनर्तकैः स्वस्वप्रदेशानां सांस्कृतिक- सामाजिक- लोककलात्मकवैशिष्ट्यानि सजीवं निरूप्य भारतस्य समृद्धसांस्कृतिकपरम्परायाः तथा 'अनेकत्वे-ऽप्येकत्वम्' इति राष्ट्रियभावनायाः अनुपमं वैभवं सम्यगुद्भावितम्। स्पर्धायाः प्रारम्भः चेनाब-सदनस्य छात्रैः प्रस्तुतेन पञ्जाबप्रदेशस्य लोकजीवनं, कृषिसंस्कृतिं, उत्सववैभवं च प्रतिबिम्बयता भाङ्गडानृत्येन अभवत्। अनन्तरं यमुना-सदनस्य छात्रैः तेलङ्गाण- आन्ध्रप्रदेश- राजस्थानप्रदेशेषु प्रसिद्धस्य बञ्जारा- जनजातीय- परम्परायाः द्योतकं लम्बाडीनृत्यम् उत्कृष्टतया प्रस्तुतम्। झेलम-सदनस्य छात्रैः हरियाणाप्रदेशस्य शौर्यं, गौरवं, लोकजीवनं च भावपूर्णतया निरूपितम्। रावीसदनस्य छात्रैः सम्बलपुरीनृत्येन ओडिशाराज्यस्य पश्चिमाञ्चलस्य लोकसंस्कृतेः समृद्धिः दर्शिता। गङ्गासदनस्य छात्रैः गोमीरानृत्यस्य माध्यमेन पश्चिमबङ्गस्य उत्तरदिनाजपुरक्षेत्रस्य सांस्कृतिकपरम्परा, धर्मस्याधर्मे विजयः प्रभावकरूपेण च अभिव्यक्तः।

समापनप्रस्तुतौ सतलजसदनस्य छात्रैः गरबानृत्येन गुजरातप्रदेशस्य लोकोत्साहः, ऐक्यम्, उत्सवधर्मिता च सुमनोहरतया सादरीकृता। वेषभूषा, भावाभिव्यक्तिः, लयबद्धता, समन्वयः, नृत्यरचना, शारीरिकसन्तुलनम् इत्यादीनां मानदण्डानामाधारेण निर्णायकमण्डल्या यमुनासदनं, झेलमसदनं संयुक्तरूपेण प्रथमस्थानम्, सतलजसदनं तथा रावीसदनं संयुक्तरूपेण द्वितीयस्थानम्, गङ्गासदनं, चेनाबसदनं च संयुक्तरूपेण तृतीयस्थानं च प्रदत्तम्। अन्तःकरणस्थितभावानाम् अभिव्यक्तेः परमं कलामाध्यमं नृत्यम्- प्राचार्यः डॉ. ए. एस. गङ्गवारः समारोहे प्राचार्यः डा. ए. एस. गङ्गवारः छात्राणां मनोज्ञप्रस्तुतीः मुक्तकण्ठेन प्रशंसन् अवदत्- "नृत्यं न केवलं शारीरिकचेष्टानां समाहारः, अपि तु अन्तःकरणस्थितभावानां, संवेदनानाम्, अनुभवानां च कलात्मकाभिव्यक्तेः परमं सशक्तं माध्यमम्। एतत् जीवने नित्यनूतनोल्लासस्य, ऊर्जायाः, आनन्दस्य च प्रतीकमस्ति।" सः त्रिदिवसीयस्य अस्य सफलसांस्कृतिकमहोत्सवस्य आयोजनार्थं सर्वान् प्रतिभागिनः छात्रान्, समर्पितान् शिक्षकान् हार्दम् अभिनन्द्य सर्वदा जीवने उत्साहम् उमङ्गं च धारयितुम् प्रेरितवान्। स्पर्धायाः निर्णायकमण्डल्यां वरिष्ठविभागस्य शिक्षकः नितेशकुमारः, शिक्षिके तनुश्री घोषः, स्मृतिरायः च समाविष्टे आस्ताम्। कार्यक्रमस्य सुसम्पन्नं सञ्चालनं पञ्चमकक्षायाः छात्रः पुष्पेशशेखरः, छात्रा स्वधाप्रियवी च प्रगल्भतया अकुरुताम्।

## चलच्चित्रवार्ता

# 'आवारापन 2' इत्यस्य विज्ञापन पुटकं प्रसारितं, खलनायिकायाः भूमिकायां शबाना आज़मी दृष्टा




**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई।**
'आवारापन' इति चलच्चित्रम् इमरान हाश्मी महोदयस्य जीविकायाः उत्तमेषु चित्रेष्वेकम् अस्ति। अस्य बहूनि गीतानि अद्यापि अतीव लोकप्रियाणि सन्ति। अस्य चित्रस्य लोकप्रियतायां संगीतस्य महत् योगदानम् आसीत्। अधुना अस्यैव चित्रस्य उत्तरभागः (सीक्वल) 'आवारापन २' आगच्छन् अस्ति, यः आगस्तमासस्य १४-दिनाङ्के चलच्चित्रगृहेषु प्रदर्शितः भविष्यति। अस्मिन् वारे चित्रे इमरान हाश्मी महोदेन सह दिशा पाटनी, शबाना आज़मी च मुख्यभूमिकायां दृश्येते। चित्रस्य प्रदर्शने अधुना अधिकः समयः न अवशिष्टः। अतः निर्मातृभिः अस्य विज्ञापनपुटकं प्रसारितम्।
'आवारापन २' इत्यस्य विज्ञापन पुटकं १-निमेषः, २५ प्रतिलवात्मकं दीर्घम् अस्ति। अस्य अवधिं दृष्ट्वा प्रतीयते यत् निर्मातारः टीज़र-इत्येव ट्रेलर-नाम्ना प्रसारितवन्तः। प्रचारचित्रस्य प्रारम्भात् अन्तपर्यन्तं तीव्रं गोलिकावर्षणं च दृश्यते। अस्यैव मध्ये इमरान हाश्मी महोदयस्य पात्रस्य 'शिवम पण्डित' इत्यस्य दुःखमपि उद्भवति। हृदयभङ्गानन्तरं तस्य अन्तः मरणभयमपि समाप्तम् अभवत्। प्रचारचित्रे दिशा पाटनी अपि कतिपयपलार्थं दृश्यते। अपरञ्च, प्रचारचित्रात् सङ्केतः लभ्यते यत् अस्य चलच्चित्रस्य मुख्या खलनायिका शबाना आज़मी अस्ति। अर्थात् अस्मिन् चित्रे इमरान हाश्मी-शबाना आज़मी महोदययोः मध्ये भीषणः सङ्घर्षः द्रष्टुं लप्स्यते।

# प्रतिभासमूहस्य विषये REBR शोधप्रतिवेदन

हिमसंस्कृतवार्ताः- रविः खरिडेहालः, बेङ्गलूरु। प्रतिभाकुण्डस्य ४६ प्रतिशतं आगामिषु ६ मासेषु कार्याणि परिवर्तयितुं योजना अस्ति। पूर्व ६ मासेषु ३२% प्रतिभासमूहः नियोक्तारं पारिवर्तयत्। प्रतिभासमूहेन कार्याणि परिवर्तयितुम् अभिप्रायः वस्तुतः परिवर्तनात् बहु अग्रे एव तिष्ठति। गतिशीलतायाः प्रबलता वस्तुतः परिवर्तनात् अधिकः भवति। REBR शोधप्रतिवेदनस्य अनुसारं कार्य-जीवनसंतुलनं कार्यपरिवर्तनस्य अन्वेषणस्य सर्वाधिकं प्रबलं कारणम् अस्ति। ५२% प्रतिभासमूहः कार्य-जीवन-संतुलनं कारणं सूचयति। ४०% व्यक्तिगतवृद्धिं पूर्णतां च सूचयन्ति। ३५% शिथिलकार्यव्यवस्थां सूचयन्ति। ३५% कार्यपरिवर्तनार्थं स्वास्थ्यं कल्याणं च कारणं सूचयन्ति। एकीकृतः कार्यस्य अनुभवः न तु प्रतिभासमूहेन कोऽपि एकः कारकः अन्विष्यते।

"



# बिहारवार्ता-: अन्तर्राष्ट्रियमानकानुसारं भविष्यति मखाना-उत्पादस्य प्रसस्करणम्

- कृषि-उत्पादानां निर्याताय लप्स्यते नवीनः आयामः, अन्तर्राष्ट्रियमानकानुसारं विकसिष्यते सम्पूर्णा व्यवस्था
- अन्तर्राष्ट्रियमानकानुसारं भविष्यति कृषि-उत्पादानां प्रसस्करणम्, निर्याताय लप्स्यते नवीनः विस्तारः— विजयकुमारसिन्हा

पटना ०६ अगस्त-मासः, २०२६

**हिमसंस्कृतवार्ता, राघवनाथझा।**

माननीयः कृषिमंत्री श्रीविजयकुमारसिन्हा राज्यात् कृषि-उत्पादानां निर्यातस्य समीक्षानन्तरम् अवदत् यत् बिहारस्य कृषि-उत्पादान् वैश्विकविपणौ प्रतिस्पर्धायाम् आनेतुं उत्पादनम्, प्रसस्करणम्, गुणवत्ता, आधारभूतसंरचना, परिवहनञ्च इत्येतेषु सर्वेषु पक्षेषु समन्वितरूपेण कार्यं क्रियते। सः अकथयत् यत् बिहारसर्वकारः कृषकान् केवलं उत्पादनपर्यन्तं सीमितं न स्थापयिष्यति, अपितु तेषाम उत्पादैः सह अन्तर्राष्ट्रियविपण्यः यावत् सम्प्रापणाय आवश्यकं सर्वमपि प्रबन्धं विकसिष्यति। माननीयः मंत्री प्रोक्तवान् यत् राज्यात् निर्यात्यमाणानां कृषि-उत्पादानां प्रसस्करणम् अन्तर्राष्ट्रिय-निर्यात-मानकानुसारं विधास्यते, येन बिहारस्य उत्पादाः वैश्विकविपणोः गुणवत्तायाः आवश्यकताः पूरयितुं शक्नुयुः।माननीयः मंत्री मखाना-उत्पादस्य निर्याते बलं ददत् अवदत् यत् अन्तर्राष्ट्रिय-गुणवत्तानुगुणं मखाना-उत्पादं सज्जीकर्तुम् आधुनिकाः 'मखाना-पॉपिंग'-केन्द्राणि स्थापयिष्यन्ते। एतेषां केन्द्राणां स्थापना कृषि-विभागस्य तथा कृषि-विज्ञान-केन्द्रस्य वैज्ञानिकानां निरीक्षणे प्राविधिक-मार्गदर्शने च भविष्यति। सर्वकारस्य सहायतया एतेषु केन्द्रेषु आधुनिक-पॉपिंग-यन्त्राणां व्यवस्था करिष्यते, येन कृषकाः आधुनिक-प्रविधेः लाभं प्राप्तुं शक्नुयुः।
माननीयः कृषिमंत्री अकथयत् यत् एतेषु केन्द्रेषु कृषकाः स्वयं स्वकीय-मखाना-उत्पादस्य प्रसस्करणं (पॉपिंग) कर्तुं शक्ष्यन्ति। एतेषु केन्द्रेषु निर्मितं मखाना-उत्पादम् अन्तर्राष्ट्रिय-गुणवत्तायाः निर्यात-मानकानाञ्च अनुरूपं भविष्यति। अनेन कृषकाः श्रेष्ठं मूल्यं लप्स्यन्ते, सहैव वैश्विकविपणौ बिहार-मखाना-उत्पादस्य याचना (माग) परिचयश्च वर्धिष्यते।
सः अवदत् यत् राज्यात् कृषि-उत्पादानां निर्यातस्य प्रोत्साहनार्थं कृषकाणां सम्बद्ध-हितधारकाणाञ्च मध्ये व्यापकः जागरूकता-अभियानः चालयिष्यते। कृषि-निर्याताय आवश्यकानाम् 'कार्गो'-विमान-उड्डीयनानां संख्यावर्धनाय, निर्यात-आधारभूतसंरचनायाः विकासाय आधुनिकीकरणाय च, तथा प्रसस्करण-एकाकानां (units) स्थापनाय तेषां संख्यावर्धनाय च सुदृढा कार्ययोजना सज्जीक्रियमाणा अस्ति।
माननीयः मंत्री अवदत् यत् बिहारसर्वकारः 'बिहार-राज्य-कृषि-निर्यात-नीत्याम्' कार्यं करोति, या शीघ्रमेव प्रवर्तिष्यते। अस्याः नीतेः प्रवर्तनेन राज्ये कृषि-उत्पादानाम् उत्पादने, प्रसस्करणे, गुणवत्ता-संवर्धने, भण्डारणे, 'लॉजिस्टिक्स'-व्यवस्थायां निर्याते च नवीना दिशा प्राप्स्यते, तथा कृषकाणाम् आयवर्धने महत्त्वपूर्णं योगदानं भविष्यति।



माननीयः कृषिमंत्री प्रोक्तवान्— "वयं उत्पादनं तु कुर्मः, स्वकीयान् उत्पादान् क्षेत्रात् खलिहानात् विपणिं यावत् अपि आनयामः, किन्तु पोताश्रयं (port) यावत् प्रापणस्य कार्यं तु अन्यः कोऽपि करोति। अधुना आवश्यकता अस्ति यत् बिहारः स्वकीय-कृषि-उत्पादानां निर्यातस्य सम्पूर्णां शृंखलाम् एव सुदृढां करोतु, येन अस्माकं कृषकाणाम् उत्पादाः साक्षात् वैश्विकविपणिं प्राप्नुयुः, अस्य च अधिकतमः लाभः अस्माकं कृषकेभ्यः एव मिलेत्।"
सः अकथयत् यत् बिहारे कृषि-निर्यातस्य अपाराः सम्भावनाः सन्ति। राज्यसर्वकारः उत्पादनात् आरभ्य प्रसस्करणम्, गुणवत्ता-प्रमाणीकरणम्, परिवहनम्, निर्यात-आधारभूतसंरचनां तथा वैश्विकविपणिं यावत् सम्प्रापणं सुनिश्चितं कर्तुं तीव्रगत्या कार्यं करोति, येन बिहारस्य कृषि-उत्पादाः विश्वविपणौ स्वकीयम् दृढं परिचयं संस्थापयितुं शक्नुयुः।

# नगरनिकाय-कर्मचारिणां मागेषु जाता सहमतिः, एकमासाभ्यन्तरे समितिः प्रदास्यति प्रतिवेदनम्




- स्वच्छताकर्मचारिणां कल्याणार्थं कृताः अनेके महत्वपूर्ण-निर्णयाः नीतीशमिश्रः

**(हिमसंस्कृतवार्ता, राघवनाथझा।**

नगरविकास-एवं-आवासविभाग-बिहारस्य माननीयस्य मन्त्रिणः श्रीनीतीशमिश्रस्य अध्यक्षतायां 'बिहार-लोकल-बॉडीज-एम्प्लॉइज-फेडरेशन', 'बिहार-राज्य-स्थानीय-निकाय-कर्मचारी-महासंघ (संयुक्त-मोर्चा)' तथा 'पटना-नगरनिगम-संयुक्त-कर्मचारी-समन्वय-समिति' इत्येतेषां प्रतिनिधीनां सह एका उपवेशनम् आयोजिता। 'बिहार-लोकल-बॉडीज-एम्प्लॉइज-फेडरेशन', 'बिहार-राज्य-स्थानीय-निकाय-कर्मचारी-महासंघ (संयुक्त-मोर्चा)' तथा 'पटना-नगरनिगम-संयुक्त-कर्मचारी-समन्वय-समिति' इत्येतेषां प्रतिनिधिभिः कर्मकर-विरामस्य (हड़ताल) समाप्त्याः घोषणा कृता। मन्त्री श्रीनीतीशमिश्रः अकथयत् यत् दैनन्दिन-पारिश्रमिक-स्वच्छताकर्मचारिणां सेवाशर्त-अन्यसुविधानां सन्दर्भे तेभ्यः संविदाकर्मचारिणाम् इव एकसार्धं-मासिक-मानदेयस्य देयकं, मूल्यवर्धनानुसारं (महंगाई) नियमित-वृद्धिः, प्रति-दशवर्षस्य सेवानन्तरं मानदेय-उत्क्रमणम्, उपार्जित-अवकाशः, प्रतिवर्षं १६ दिनानाम् आकस्मिक-अवकाशः, महिलाकर्मचारिभ्यः (प्रतिमासं) २ विशेष-अवकाशौ, सर्वाभ्यः महिलास्वच्छता-कर्मचारिभ्यः मातृत्व-अवकाशः, सर्वभ्यः स्वच्छताकर्मचारिभ्यः चिकित्सा-बीमा, दुर्घटना-बीमा, जीवन-बीमा च, तथा सेवापूर्त्यनन्तरं उपादानस्य (gratuity) प्राविधानस्य प्रवर्तने राज्यसर्वकारस्य सैद्धान्तिकी सहमतिः ज्ञापिता।एतदर्थं निर्णयः गृहीतः यत् नगरविकास-एवं-आवासविभागस्य सचिवस्य श्रीअनिमेषपराशरस्य अध्यक्षतायां राज्यसर्वकारेण एका समितिः गठीयताम्, यस्यां नगरायुक्तः, कार्यपालक-अधिकारी, अन्यसदस्याश्च अतिरिच्य संयुक्तमोर्चायाः नामनिर्दिष्टः प्रतिनिधिः अपि सम्मिलितः भविष्यति। श्रीमिश्रः अवदत् यत् एषा समितिः एतेषु विषयेषु एकमासाभ्यन्तरे स्वकीय-प्रतिवेदनं प्रदास्यति, येन राज्यसर्वकारेण तस्मिन् यथोचितः निर्णयः ग्रहीतुं शक्येत। एतदपि सम्मतं यत् कस्यापि दैनन्दिन-पारिश्रमिक-कर्मचारिणः निष्कासनं विना ठोसकारणम् एवं विहितप्रक्रियां न भविष्यति, तादृश-प्रतिकूल-निर्णयानां विरुद्धम् अपील-याचिका-समर्पणस्य अवसरः अपि प्रदास्यते। सहैव सर्वेषां दैनन्दिन-स्वच्छताकर्मचारिणां सेवा-इतिहासः अङ्कीकृत्य (digitized) सुरक्षितः स्थापयिष्यते।
मन्त्री प्रोक्तवान् यत् 'आउटसोर्सिंग'-माध्यमेन कार्यं कुर्वतां स्वच्छताकर्मचारिणां कृते एतत् सुनिश्चितं करिष्यते यत् संस्थायाः (agency) परिवर्तनानन्तरमपि ते यथासम्भवं यथावत् स्थाप्येरन्। तेषां पारिश्रमिके कस्यापि प्रकारस्य अवैधानिकी कटौती न भवेत्, तथा च तेषां वेतनं साक्षात् तेषां कोषाध्यक्ष-खातेषु (bank accounts) प्रेषयिष्यते। सहैव 'बोनस-अधिनियम' अनुसारं तेभ्यः बोनस-राशिः प्रदास्यते, तथा वाहन/यन्त्राणां त्रुटेः (breakdown) अवधौ अपि चालकेभ्यः पारिश्रमिकं दास्यते। एतदतिरिच्य श्रम-नियमानाम् अनुपालना अपि सुनिश्चिता भविष्यति।सः अकथयत् यत् नगरनिकायानां नियमित-कर्मचारिणां कृते ACP/MACP इत्यस्य लाभः पुनः स्थापयितुम् अपि सहमतिः जाता। अस्मिन् सन्दर्भे पूर्वं निर्गताः आदेशाः एतावत्पर्यन्तं संशोध्यन्ते।
श्रीमिश्रः ज्ञापितवान् यत् उपवेशने एतदपि गृहीतं यत् वर्तमान-हड़ताल-आलोके स्वच्छताकर्मचारिणां विरुद्धं कृताः दण्डात्मकाः कार्यवाहीः शीघ्रमेव प्रत्याह्रियन्ते, तथा च तेषाम अनुपस्थितेः विरुद्धं देय-अवकाशः स्वीक्रियते।

# इण्डोनेशियादेशस्य

**आई.ए.एच.एन. जीड़े पुड़ज़ा, मातरम् (इण्डोनेशिया) तथा च केन्द्रीयसंस्कृतविश्वविद्यालयस्य मध्ये सामञ्जस्यपत्रे (MoU) हस्ताक्षरम्**



केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली तथा च इण्डोनेशियादेशस्य 'केमेंतेरियन अगामा आर.आई.' इत्यस्य अधीनस्य 'इन्स्टिट्यूट अगामा हिन्दू नेगेरी' (IAHN) जीड़े पुड़ज़ा, मातरम् इत्यस्य मध्ये शैक्षणिक-सांस्कृतिक-सहयोगं सुदृढं कर्तुं एकस्मिन् सामञ्जस्यपत्रे (MoU) हस्ताक्षरम् अभवत्।
अस्मिन् अवसरे केन्द्रीयसंस्कृत-विश्वविद्यालयस्य कुलपतयः प्रो. श्रीनिवासवरखेड़िमहोदयाः, आई.ए. एच.एन. जीड़े पुड़ज़ा, मातरम् इत्यस्य माननीयाः कुलपतयः तथा च उभयोः संस्थानयोः वरिष्ठाधिकारिणः उपस्थिताः आसन्। एतत् सामञ्जस्यपत्रं संस्कृत-हिन्दूअध्ययन-भारतीयज्ञानपरम्परा-योग-दर्शन-संस्कृति-अनुसन्धान-क्षेत्रेषु सहयोगं प्रोत्साहयिष्यति। अस्य अन्तर्गतम् नवीनाः शैक्षणिकपाठ्यक्रमाः, छात्र-शिक्षक-आदानप्रदानम्, संयुक्ताः अनुसन्धानपरियोजनाः, संगोष्ठ्यः, कार्यशालाः तथा च प्रशिक्षण-कार्यक्रम्याः आयोजयिष्यन्ते।

# कृत्रिम-बुद्धिमत्ता-सङ्गणक-प्रविधिभ्यां बिहारस्य विधायकानां विधानपारिषदाञ्च भविष्यति सामर्थ्य-वर्धनम् – मुख्यमन्त्री





## ❑ विधानमण्डल-सदस्यानां कृते आयोजिते 'प्रबोधन-कार्यक्रम' सम्बोध्य मुख्यमन्त्रिणा कृतं 'परियोजना-निरीक्षण-प्रणाली' इति जाल-पुटाधारेण (Portal) उद्घाटनम्

(पटनाः ०६ अगस्त-मासः, २०२६)

**हिमसंस्कृतवार्ता, राघवनाथः झा।** बिहारस्य माननीयः मुख्यमन्त्री श्रीसम्राट्-चौधरी अद्य बिहार-विधानमण्डल-सदस्यानां कृते कृत्रिम-बुद्धिमत्तायाः संवेदीकरणाय तथा मुख्यमन्त्री-क्षेत्र-विकास-योजनायाः कार्यान्वयनाय आयोजिते प्रबोधन-कार्ये सम्मिलितः अभवत्। बिहार-विधानसभायाः विस्तारित-भवने आयोजिते अस्मिन् कार्यक्रमे मुख्यमन्त्रिणा दीप-प्रज्वालनेन विधिवत् शुभारम्भः कृतः। कार्यक्रम-वेलायां मुख्यमन्त्रिणा मुख्यमन्त्री-क्षेत्र-विकास-योजनान्तर्गतम् 'परियोजना-निरीक्षण-प्रणाली' इति जाल-पुटस्य (Portal) दूरस्थ-नियन्त्रणेन औपचारिकः शुभारम्भः विहितः।
सभां सम्बोधयन् मुख्यमन्त्री प्रोक्तवान् यत्—

"अद्यतनः एषः कार्यक्रमः अतीव महत्त्वपूर्णः अस्ति। कृत्रिम-बुद्धिमत्तया तथा अङ्कीय-प्रविधिना बिहारस्य विधायकानां विधानपारिषदाञ्च सामर्थ्य-वर्धनम् (Capacity Building) भविष्यति।" सः अकथयत् यत् विंशति-पञ्चविंशति-वर्षेभ्यः पूर्वं सङ्गणकस्य उपयोगिता सीमिता आसीत्, किन्तु अद्य कृत्रिम-बुद्धिमत्ता अङ्कीय-प्रविधिश्च शासनस्य, प्रशासनस्य, विकासस्य च महत्तमा आवश्यकता संजाता अस्ति। सर्वे मन्त्रिणः, विधायकाः, विधानपारिषदश्च एतासां तकनीकिनां भूयांसम् उपयोगं कुर्वन्तु, येन जनसामान्येन सह श्रेष्ठः संवादः स्थापयितुं शक्येत, क्षेत्रस्य च समुचितः विकासः सुनिश्चितः भवेत्।
सः प्रतिपादितवान् यत् विकास-योजनानाम् प्राक्कलन-निर्माणेषु अपि कृत्रिम-बुद्धिमत्तायाः प्रयोगः करणीयः। भवन-निर्माण-विभागस्य एकस्य प्राक्कलनस्य कृत्रिम-बुद्धिमत्तया परीक्षणे कृते पञ्चतः सप्त-प्रतिशत-पर्यन्तं व्यय-न्यूनता दृष्टा। तेन रक्षितस्य धनस्य उपयोगः अन्येषु विकास-कार्येषु विधातुं शक्यते। अस्मिन् आधुनिक-युगे यदि वयं कृत्रिम-बुद्धिमत्तायाः प्रयोगं न करिष्यामः, तर्हि विकास-स्पर्धायां पृष्ठतः स्थास्यामः।
मुख्यमन्त्रिणा भाषितं यत् बिहारे 'सहयोग-कार्यक्रमस्य' सञ्चालने तथा एक-कोटि-पात्र-जनेभ्यः 'राशन-पत्रिका' प्रदाने राज्यसर्वकारः कृत्रिम-बुद्धिमत्तायाः उपयोगं करोति। बिहारे कृषकाणाम् अङ्कीय-सर्वेक्षणं प्रचलद् अस्ति, तथा षष्टि-लक्ष कृषकान् 'अङ्कीय-परिचय-पत्र' प्रणाल्या सह योजयितुं लक्ष्यं निर्धारितम्। जनप्रतिनिधयः प्रविधि-आधारित-निरीक्षण-प्रणाल्याः प्रयोगं कृत्वा योजनानां प्रभावि-कार्यान्वयने विशेषं ध्यानं दद्युः। सः अवदत् यत् विद्यालयेषु सङ्गणक-शिक्षा दीयते, किन्तु आधुनिक-युगस्य आवश्यकताः विलोक्य एषा पुनः सुदृढा करणीया। मुजफ्फरपुर-मण्डले 'कृत्रिम-बुद्धिमत्ता तथा सङ्गणक-विज्ञान-विश्वविद्यालयस्य' स्थापना क्रियमाणा अस्ति। मुख्यमन्त्रिणा एतस्मिन् अपि बलं दत्तम् यत् सर्वेषां मन्त्रिणां, विधायकानां, विधानपारिषदां च सहैव तेषां सहायकानाम् कृते अपि काले-काले कृत्रिम-बुद्धिमत्तायाः, सङ्गणकस्य, सामाजिक-माध्यमानाञ्च प्रशिक्षणम् आयोजनीयम्, येन ते प्रविधिना सह निरन्तरं नवीकृताः (Updated) भवेयुः, जनसामान्यस्य च उत्तमाम् अर्हतां सेवां विधातुं शक्नुयुः। सः अकथयत् यत् बिहारस्य सर्वासु पञ्चायतैः सह 'ऋतु-वेधशालाः' सञ्चालिताः सन्ति, यत्र 'ऋतु-पूर्वानुमानम्' ७० तः ८० प्रतिशत-पर्यन्तं यथार्थं सिध्यति। एषा प्रविधिः कृषये ग्रामीण-विकासाय च अतीव उपयोगिनी अस्ति। बिहारः लोकतन्त्रस्य जननी अस्ति, तथा च आधुनिक-प्रविधेः माध्यमेन लोकतान्त्रिक-व्यवस्था मङ्गलमयी सुदृढा च कर्तुं शक्यते।अस्मिन् कार्यक्रमे बिहार-विधानसभायाः अध्यक्षेण डॉ० प्रेमकुमारेण मुख्यमन्त्रिणः पुष्पेण अङ्गवस्त्रेण च स्वागतं कृतम्। अस्मिन अवसरे उप-मुख्यमन्त्री बिजेन्द्र-प्रसाद-यादवः, बिहार-विधान-परिषदः सभापतिः अवधेश-नारायण-सिंहः, बिहार-विधानसभायाः उपाध्यक्षः नरेन्द्र-नारायण-यादवः, बिहार-सर्वकारस्य मन्त्रिगणः, विधायकाः, विधानपारिषदः, योजना-एवं-विकास-विभागस्य अपर-मुख्य-सचिवः डॉ० एन० विजयलक्ष्मी, मुख्यमन्त्रिणः सचिवः संजय-कुमार-सिंहः इत्येतेषाम् अतिरिच्य अन्ये वरिष्ठाः अधिकारिणः बिहार-विधानमण्डलस्य कर्मचारिणश्च उपस्थिताः आसन्।

# बिहारस्य कला-संस्कृति-परम्पराणां संरक्षणाय राज्य-मन्त्रिपरिषदा प्रदत्ता त्रयाणां प्रस्तावानां स्वीकृतिः



**ज्ञान-भारतम्-मिशन-अन्तर्गतम् तालपत्राणां ग्रन्थानाञ्च (पाण्डुलिपिनाम्) अङ्कीकरणाय स्वीकृतम् ₹६.२३ कोटिरूप्यकाणि**

**हिमसंस्कृतवार्ता, राघवनाथः झा।** बिहारस्य कला, संस्कृति, पुरातात्विक तथा पाण्डुलिपि-विरासतस्य संरक्षणाय, संवर्धनाय वैज्ञानिक-प्रबन्धनाय च राज्यसर्वकारेण महत्तमाः निर्णयाः गृहीताः। राज्य-मन्त्रिपरिषदा कला-संस्कृति-विभागेन सम्बद्धेभ्यः त्रिभ्यः प्रमुख-प्रस्तावेभ्यः प्रशासकीय-स्वीकृतिः प्रदत्ता। मन्त्रिपरिषदा कला-एवं-संस्कृति-विभागस्य पुरातत्त्व-निदेशालयान्तर्गतम् पूर्व-स्वीकृतानां १६ प्राविधिक-पदानां विरुद्धम् १२ पदेषु ११ मासात्मक-अवधये अथवा नियमित-नियुक्तिं यावत् संविदा-आधारित-नियोजनस्य प्रस्तावः स्वीकृतः। प्राविधिक-कर्मचारिणां उपलब्ध्या राज्यस्य पुरातात्विक-स्थलानां स्मारकाणाञ्च उत्खनन-अन्वेषण-सर्वेक्षण-संरक्षण-सौन्दर्यीकरण-जीर्णोद्धारादि-कार्याणां कुशलतापूर्वकं प्रबन्धने सञ्चालने च महती सहायता लप्स्यते।
सहैव मन्त्रिपरिषदा भारतसर्वकारस्य प्रमुख-योजनायाः 'ज्ञान-भारतम्-मिशन' अस्य अन्तर्गतम् सर्वेक्षितानां पाण्डुलिपिनाम् अङ्कीकरणाय (Digitization) तथा 'मेटाडेटा'-निर्माणाय ₹६,२३,६८,७१८ (षट्-कोटि-त्रयोविंशति-लक्ष-अष्टषष्टि-सहस्र-सप्तशत-अष्टादश रुप्यकाणि) व्ययस्य प्रशासकीय-स्वीकृतिः प्रदत्ता। भारतस्य समृद्ध-ज्ञान-परम्परायाः बौद्धिक-विरासतस्य च संरक्षणार्थं सञ्चालित-योजनायाः माध्यमेन बहुमूल्य-पाण्डुलिपयः अङ्कीय-रूपेण सुरक्षिताः भूत्वा शोधार्थीनां, छात्राणां, सामान्य-जनानाम् आगामि-सन्ततीनाञ्च कृते सुलभ-लभ्याः भविष्यन्ति।
'प्रत्येक-गृहं त्रिवर्ण-ध्वज-अभियान-२०२६' (हर घर तिरंगा) अस्य कृते ₹६.१२ कोटिरूप्यकाणां स्वीकृतिः राज्य-मन्त्रिपरिषदा कला-एवं-संस्कृति-विभागस्य 'प्रत्येक-गृहं त्रिवर्ण-ध्वज-अभियान-२०२६' अस्य सफल-आयोजनाय ₹६,१२,००,००० (षट्-कोटि-द्वादश-लक्ष रुप्यकाणि) व्ययस्य अपि स्वीकृतिः प्रदत्ता। अनेन निर्णयेन राज्ये अभियानस्य सफलायोजनाय तत्सम्बद्धानां गतिविधिनां कार्यान्वयनाय च मार्गः प्रशस्तः अभवत्।
बिहारसर्वकारस्य कला-एवं-संस्कृति-विभागस्य मन्त्री डॉ. प्रमोदकुमारः अकथयत् यत् राज्यसर्वकारस्य एते निर्णयाः बिहारस्य ऐतिहासिक-पुरातात्विक-पाण्डुलिपि-विरासतस्य संरक्षणेन सह सांस्कृतिक-राष्ट्रीय-चेतनायाः सुदृढीकरणाय ऐतिहासिक-सोपानाः सन्ति। अनेन एकतः पुरातत्त्व-निदेशालयस्य प्राविधिक-क्षमता सुदृढा भविष्यति, अपरतः बिहारस्य बहुमूल्य-ज्ञान-परम्परा आधुनिक-प्रविध्या सुरक्षिता भूत्वा व्यापक-स्तरे उपलभ्या भविष्यति। अस्य अभियानस्य माध्यमेन राज्यभरि राष्ट्रिय-गौरवस्य देशभक्तेश्च भावना वर्धिष्यते।

# लक्ष्मीदेवीशराफ- आदर्श- महाविद्यालये नव- छात्राणाङ्कृते संस्कृतसम्भाषणशिबिरम् आयोजितम्







**हिमसंस्कृतवार्ताः- आशुतोष पाण्डेयः, देवगृहम्**

दिनाङ्क ०५/०८/२०२६ तः दिनाङ्क १४/०८/२०२६ पर्यन्तं भगवतः भूतभावनबैद्यनाथस्य पवित्रपावनभूमौ स्थितलक्ष्मीदेवीशराफ- आदर्श- संस्कृत- महाविद्यालये नवछात्र- छात्राणाङ्कृते संस्कृत- सम्भाषण- शिबिरस्यायोजनमनुष्ठीतम्। कार्यक्रमस्यास्योद्घाटनसत्रे मञ्चालङ्कृतवन्तः महाविद्यालयस्य सुधयः विद्वद्वरेण्याः शास्त्राध्ययन- शास्त्राध्यापन- छात्राणामभिवृद्ध्यर्थञ्चिन्तननिरताः प्राचार्याः प्रो. के. साम्बशिवमूर्ति महाभागाः, महाविद्यालयस्योपप्राचार्याः ज्योतिषशास्त्रविचक्षणाः छात्राणां प्रेरकाः डॉ. नवनीतशर्ममहाभागाः कार्यक्रमस्यास्य संयोजकाः कीर्तिमन्तो विद्वांसो वेदवेदितव्याः शास्त्रपरम्पराः उन्नायकाः डॉ. राहुल पोखरियालमहाभागाः, साहित्य विभागाध्यक्ष डॉ. वसन्तमुद्रा महाभागाः, व्याकरणविभागाध्यक्षाः डॉ. नितेशद्विवेदी महाभागाः, आङ्गलविभागाध्यक्षाः डॉ. राकेशपाण्डेय महाभागाः, ज्योतिषमर्मज्ञा डॉ. किसलय झा महाभागाः, हिन्दी विभागाध्यक्षा डॉ. रघुवरचौधरी महाभागाः अन्येऽपि प्रत्यक्षपरोक्षरूपेण समागताः आचार्याः, छात्र- छात्राश्चासन्। वैदिकमंगलाचरणम् महाविद्यालयीयछात्रः अमरनाथेनाचरितम्, मञ्चसंचालनं डॉ. राहुल पोखरियाल महाशयेनानुष्ठीतम्, दीपप्रज्वलनं महाविद्यालयस्य प्राचार्यवरैः सह प्राध्यापकगणैः कृतम्। प्राचार्यचराः प्रबोधनकाले प्रोक्तवन्तः- संस्कृतसम्भाषणस्य क्रमिको विकासः शास्त्रज्ञानाय भाषाया महत्त्वञ्च। आरम्भे वाक्यं शुद्धमशुद्धं वा भवेदिति चिन्तामकृत्वा जनाः संस्कृतसम्भाषणं कुर्युः। अत्रैवोदाहरणं दीयते यदष्टाध्याय्याम् आचार्यपाणिनिः प्रथमं वृद्धिरादैजिति सरलं सूत्रमसूत्रयत्। तदनन्तरं स स्त्रीप्रत्ययप्रकरणे टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तय- प्ठक्ठञ्कञ्क्वरप इति क्लिष्टं सूत्रमसूत्रयत्। तेनैव प्रकारेण वयमपि पूर्वं सरलां भाषां वदेम ततश्च शास्त्रीयभाषाया अपि प्रयोगं कुर्याम। यथा कश्चिद्बालकस्तरणायाशयेष्ववतीर्य यावत्तरणाभ्यासं न करोति तावत्स तर्तुं न शक्नोति तथैव भाषाभ्यासोऽप्यावश्यकः। मूलग्रन्थानां पठनं सिद्धान्तानां ज्ञानञ्चावश्यकं वर्तते परन्तु तावदेव भाषाज्ञानमप्यनिवार्यमस्ति। भाषामन्तरा शास्त्राणामवगमनं दुष्करं भवेत्। अस्मिन्विषये यथोक्तं वाल्मीकिरामायणे सुन्दरकाण्डे त्रिंशत्तमे सर्गेऽष्टादशे श्लोके यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् रावणं मन्यमाना मां सीता भीता भविष्यतीति। अशोकवाटिकायामुपविष्टां सीतां विलोक्याहं स्वकीयां वार्तां तस्यै कथं निवेदयेयमिति हनूमान्विचारमग्नोऽभवत्। स अचिन्तयद्यदि स द्विजातिवत्परिष्कृतां स्पष्टां संस्कृतभाषां वदिष्यति तर्हि तं रावणं मत्वा सीता भीता भविष्यति यतो हि वानराय तादृशी भाषा सर्वथासम्भवा प्रतीयते। अतः साधारणमनुष्यवल्लोकभाषयैव स वदेत्। तथैव नूतनच्छात्राः प्रौढभाषां श्रुत्वा भीता न भवेयुरिति हेतोः सरलभाषयैव वयं स्वविचारान्प्रकटयेम। तदनन्तरं धन्यवादं ज्ञापयन्संयोजकः प्रोवाच यन्महाभाष्यकारेण पतञ्जलिना महाभाष्ये निगदितं तद्यथा कूपखनकः कूपं खनन्यद्यपि मृदा पांशुभिश्चावकीर्णो भवति सोऽप्सु सञ्जातासु तत एव तं गुणमासादयति येन स च दोषो निर्हण्यत इति। तेनैव दृष्टान्तेन सम्भाषणेऽशुद्धशब्दानां प्रयोगेण छात्राणां या मलिनतोत्पत्स्यते सा पश्चात्संस्कृतस्य शुद्धशब्दानां प्रयोगादेव विनशिष्यति। ततः शिविरशिक्षकः अंशुमानमहोदयः ध्येयमन्त्र गीताभ्यासादिकञ्चाकारयत्। अन्ते चैकात्मतामन्त्रेण शान्तिमन्त्रेण चास्य सत्रस्य समापनमभवत्

# लौकिकन्यायकोशः

## आरघट्टीन्यायः

आरघट्टः नाम कूपात् जलम् उद्धर्तुम् उपयुज्यमानं पात्रम्। रज्ज्वाः अन्ते भाण्डम् एकं बद्ध्वा तत् कूपे शनैः त्यक्त्वा कूपात् जलम् उद्धरन्ति। भाण्डात् जलं रिक्तीकृत्य पुनः भाण्डं कूपे पातयन्ति। एवं स्वैरं जलस्य उद्धरणं क्रियते। शरीरे श्वासरूपेण सञ्चरन् वायुः आरघट्ट-घटीयन्त्रन्यायेन प्रत्येकं नाड्यां संचरति। पुनः पुनः क्रियमाणम् एकं विषयं सूचयितुम् अस्य न्यायस्य प्रयोगः भवति।

**"सार्धं घटीद्वयं नाडीरेकैकार्कोदया वहेत्।**
**आरघट्टघटी भ्रान्तिन्यायो नाडयोः पुनःपुनः।।"**

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्यतन्यः वार्ताः अतीव विचित्राः सन्ति। आस्ट्रेलियादेशे मार्कपार्टन- नामकेन एकेन राजनेत्रा सभामध्ये एकः दूरभाषसन्देशः प्रेषितः। तेन लिखितम् "धिक्! मम कार्यम् अतीव नीरसं वर्तते" इति। पश्चात् विवादेन सः स्वदोषम् अङ्गीकृतवान् अस्ति।

**नन्दिनी-** अहो! राजनेतुः एतादृशं नीरसं व्यवहारं श्रुत्वा जनाः खिन्नाः जाताः। चीनदेशस्य वार्ता अपि तादृशी एव अस्ति, तत्र एकेन अधिकारिणा एकः कर्मकरः कार्यालयात् निष्कासितः। यतः तेन कर्मकरेण स्वविवाहे स्वमाता एव वर्जिता। मातुः रूपं सुन्दरं नास्ति इति विचिन्त्य तेन एवं कृतम्। तत् ज्ञात्वा क्रुद्धेन अधिकारिणा सः दण्डितः।

**काव्या-** धिक् तम् कृतघ्नं पुत्रम्! अधिकारिणा सम्यक् एव कृतम्। इदानीं वाशिङ्टन्नगरस्य वार्तां शृणु। तत्र तीव्र-गति-वाहनानां स्पर्धा आयोजिता। वाहनानां वेगेन मार्गेषु स्थितानि गर्ताच्छादनानि आकाशे उत्क्षिप्तानि। अतः तानि आच्छादनानि आयोजकैः अयसा कीलितानि।

**नन्दिनी-** आश्चर्यम्! वाहनानां वेगेन आच्छादनानि अपि उड्डीयन्ते इति विचिन्त्य एव भयं भवति। अन्तिमा वार्ता तन्त्रज्ञानसंस्थायाः संस्थापकस्य विषये अस्ति। एकेन संस्थापकेन एका विचित्रा सूचना उद्घोषिता। ये जनाः स्वशरीरे संस्थायाः चिह्नं चित्रयन्ति, तेभ्यः एव उद्योगावकाशः दत्तः। अस्याः मूर्खतायाः कृते सर्वैः तस्य निन्दा कृता। तदनन्तरं सः क्षमां याचितवान् अस्ति।

**काव्या-** हा हा! अद्यतन्यः वार्ताः अत्रैव समाप्ताः। नमो नमः।

# वो शाम कुछ अजीब थी...' इत्यादि कालजयीगीतैः सञ्जाता सङ्गीतमयी श्रद्धाञ्जलिः प्रसिद्धगायक-अभिनेता किशोरकुमारस्य जयन्त्यां बोकारोनगरे श्रद्धाञ्जलिः

**हिमसंस्कृतवार्ता- सौरभः दे, बोकारोनगरम्।**

प्रख्यातस्य चलच्चित्रपार्श्वगायकस्य अभिनेतुः च किशोरकुमारस्य जयन्त्याः उपलक्ष्ये मङ्गलवासरस्य सायंकाले सेक्टर-१२ इति स्थले स्वरागिनी म्यूजिकल ग्रुप् इत्यस्य बैनराधः रमणचौधरी- महोदयस्य रागिनीसिन्हा- अम्बष्ठ- महोदयायाश्च संयोजने सङ्गीतकार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे सुपरिचिताः गायकाः अरुणपाठकः, रमणचौधरी, सोमेशमिश्रः, तथा गायिकाः रञ्जूसिंह, रिद्धिमा, सुनीतागुप्ता, रञ्जनासिन्हा, श्वेताप्रियदर्शिनी, पूर्णेन्दुकुमारसिंहः च किशोरकुमारस्य चित्रे माल्यार्पणं पुष्पाञ्जलिं च समर्प्य श्रद्धां निवेदितवन्तः। वक्तृभिः 'किशोरकुमारः बहुआयामिक- कलाकाररूपेण स्मृतः। तैः उक्तं यत् चलचित्रसङ्गीतक्षेत्रे तस्य योगदानं स्वर्णाक्षरैः लेखनीयम्। स्वमधुरस्वरेण सः असंख्यान् जनान् सम्मोहितवान्, अभिनेतारूपेणापि अविस्मरणीयां छापां स्थापितवान्। अद्यापि तेन गीतानि जनमानसेषु समानरूपेण लोकप्रियाणि सन्ति। अवसरेऽस्मिन् कलाकारैः किशोरकुमारस्य प्रसिद्धगीतानां सुमधुरप्रस्तुतिभिः तस्मै स्वरमयी श्रद्धाञ्जलिः समर्पिता। गायकः अरुणपाठकः 'वो शाम कुछ अजीब थी...', 'बने चाहे दुश्मन ज़माना हमारा...', 'रिमझिम गिरे सावन...' इत्यादीनि गीतानि सस्वरं प्रस्तुतवान्। ततः रञ्जूसिंहया सह 'तेरे मेरे मिलन की ये रैना...', 'कोरा कागज था ये मन मेरा...', इति गीत प्रस्तुतवती

# हास्यकणिका

पतिः पत्नीं वदति- "अधुना अस्माकं विवाहः सम्पन्नः अस्ति, अतः त्वं 'मम' इति मा वद; 'अस्माकम्' इति वद।"

**पत्नी-** "अस्तु"।

अपरदिने पत्नी कपाटिकाम् उद्घाट्य किमपि अन्विष्यती तिष्ठति।

पतिः पृच्छति- "किं अन्विष्यसि?"

**पत्नी-** "अस्माकं पेटीकोटं न प्राप्यते। कुत्रचित् त्वमेव तत् परिधाय न गतः?"

पतिः- 😳😳

**-विदुषी**